# li NgAShTakaM

# લિઙ્ગાષ્ટકમ્

## Document Information

Text title : liNgAShTakaM

File name : lingashh.itx

Category : aShTaka, shiva

Location : doc_shiva

Transliterated by : Srinivas Sunder

Proofread by : Srinivas Sunder

Latest update : Feb. 10, 1995, December 3, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# લિઙ્ગાષ્ટકમ્

બ્રહ્મમુરારિસુરાર્ચિતલિઙ્ગમ્ નિર્મલભાસિતશોભિતલિઙ્ગમ્ । (નિર્મલભાષિત)
જન્મજદુઃખવિનાશકલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવલિઙ્ગમ્ ॥ ૧॥

દેવમુનિપ્રવરાર્ચિતલિઙ્ગમ્ કામદહમ્ કરુણાકર લિઙ્ગમ્ ।
રાવણદર્પવિનાશનલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ॥ ૨॥

સર્વસુગન્ધિસુલેપિતલિઙ્ગમ્ બુદ્ધિવિવર્ધનકારણલિઙ્ગમ્ ।
સિદ્ધસુરાસુરવન્દિતલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ॥ ૩॥

કનકમહામણિભૂષિતલિઙ્ગમ્ ફણિપતિવેષ્ટિત શોભિત લિઙ્ગમ્ ।
દક્ષસુયજ્ઞવિનાશન લિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ॥ ૪॥

કુઙ્કુમચન્દનલેપિતલિઙ્ગમ્ પઙ્કજહારસુશોભિતલિઙ્ગમ્ ।
સઞ્ચિતપાપવિનાશનલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ॥ ૫॥

દેવગણાર્ચિત સેવિતલિઙ્ગમ્ ભાવૈર્ભક્તિભિરેવ ચ લિઙ્ગમ્ ।
દિનકરકોટિપ્રભાકરલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ॥ ૬॥

અષ્ટદલોપરિવેષ્ટિતલિઙ્ગમ્ સર્વસમુદ્ભવકારણલિઙ્ગમ્ ।
અષ્ટદરિદ્રવિનાશનલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ॥ ૭॥ (વિનાશિત)

સુરગુરુસુરવરપૂજિત લિઙ્ગમ્ સુરવનપુષ્પ સદાર્ચિત લિઙ્ગમ્ ।
પરાત્પરં પરમાત્મક લિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ॥ ૮॥

લિઙ્ગાષ્ટકમિદં પુણ્યં યઃ પઠેત્ શિવસન્નિધૌ ।
શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ॥

॥ ૐ તત્ સત્ ॥

Encoded and proofread by Srinivas Sunder

*li NgAShTakaM*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*